श्रीगणेशायनमः॥ ॥नत्वाशौनकमाचार्यंतदुक्तस्यय
थाविधिनवग्रहमखस्याहंप्रयोगंवच्मिदीपवत्॥१॥ग्रह
ताराबलंलब्ध्वाशुभलग्नंविलोकयेत्।नोपविघ्नानवव्याधि
नोधिपीडादरिद्रता॥२॥नारिभिर्नश्यतेनित्यंकुर्वेयंस्वर्ग
मोक्षदं॥विवाहोत्सवमांगल्यैःशुभैश्चान्यैःप्रयोजकैः॥३
प्रथमंशांतिकंकुर्यात्पश्चात्कर्मसमाचरेत्।ग्रहकर्मवि
नायत्वंकरोतितुविमानवः॥४॥तत्सर्वंनिःफलंयातिश्र १

तद्धेप्युक्तंयथा।वर्षेवर्षेप्रकर्तव्यंश्रीमद्भिःशुभकां
क्षिभिः॥५॥सूर्यःसोमःस्तथाभौमोबुधोजीवःसितोर्क
जः।राहुःकेतुरमीप्रोक्ताग्रहालोकहितावहाः॥६॥वि
त्तशक्तिर्गृहेनास्तिग्रहपीडासमागता।श्रद्धयास्वल्पवि
त्तेनतमेकंपूजयेद्ग्रहं॥७॥ग्रहयज्ञस्त्रिधाःप्रोक्ताःपुरा
णःश्रुतिकोविदैः॥प्रथमोयुतहोमस्याल्लक्षहोमस्ततः
परः॥८॥तृतीयःकोटिहोमस्तुसर्वकामफलप्रदः॥त्र

जयंवाविजयंवापिमंडपंकारयेच्छुभं॥१९॥जयस्त्वष्टकरःप्रो
क्तोविजयोदशहस्तकः॥अयुतार्थेमलतद्वारमैद्यांसौम्या
मथापिवा॥२०॥उत्तरेतुदद्वारमित्येवंशौनकोब्रवीत्॥
अश्वत्थोदुंबरप्लक्षवटशाखाकृतानिच॥२१॥मंडपस्यप्रति
दिक्षंद्वाराण्येतानिकारयेत्॥तोरणानिचतान्येवशंखचक्र
गदांबुजं॥२२॥अग्निमीलेतिमंत्रेणदापयेत्पूर्वतोरणं॥प्र
तिवेदंप्रतिद्वारंमंत्रावृत्त्यातुकारयेत्॥२३॥पीतारक्तासिता २

घे

नीलाश्वेताचित्राप्रवालिका॥शुक्लाचित्रातथाकृष्णापता
काःपूर्वदिक्क्रमात्॥२४॥मंडपस्यविधिंलक्ष्ममुक्त्वाकुंडस्यक
थ्यते॥गृहस्येशानदिग्भागेपूर्वेवाप्युत्तरेथवा॥२५॥तत्रकुं
डंप्रकर्तव्यंचतुरस्रंकरावधि॥ज्ञातेशानार्धकेहोमेमुष्टिर
त्निःप्रमाणतः॥२६॥सहस्रायुतहोमेतुहस्तंहस्तद्वयंम
तं॥त्रिमेखलंसहस्रेतुअथवाचैकमेखलं॥२७॥बद्धमुष्टि
करोरत्निररत्निर्मुक्तकनिष्ठिकः॥मुष्टिमानंज्ञाताद्वैतुशतेवा

रत्निमात्रकं॥१८॥मद्स्येच्चयद्दोतव्येकुंडकुर्यात्करान्वितं
।अयुतेद्विगुणंप्रोक्तंचतुरस्रंसमंततः॥१९॥लक्षहोमेचतु
र्हस्तंकोटिहोमेष्टसंख्यया॥क्षित्रित्रयंगुलाःकार्यामेखला
स्तुमद्धस्तके॥२०॥अयुतेत्रिचतुःषड्विस्तारोद्वावयोरपि।
मेखलाःपंचवाकार्याःषट्‌वाक्षित्रिपक्षकैः॥२१॥लक्षहो
मेतथाकोटौमेखलाःकुंडमारतः।खातोविस्तारमानेनकुं
डेकुंडेसमेखलः॥२२॥समचतुरस्त्रम्याद्दग्गायारत्नुर्विकर 3
कू१ णी॥नारत्निंप्रदेशंनेविततीनांसमासोविद्यते॥२३॥याव
त्समाणारत्नुस्पान्नावद्वैवागमोनवेत्।आगमादेसवेच्छंकुः
स्तदैवनिरंछनं॥२४॥कंवंसद्धस्तकुंडेतुकारयेदेकमंगु
लं॥अयुतेयंगुलंचैवकंठेलक्षणमीरितं॥सप्तद्वादश
संख्यायायोनिःसाद्धस्तिकेमखे॥२५॥चतुर्दशांगुलांदैर्घ्या
त्विस्तारेणनवांगुलां॥२६॥अयुतेकारयेद्योनिमुत्तरेचत
तोभिक्षां॥योनिर्गजोष्टसंहत्रीसांगुलैकप्रवेशिता॥२७॥

तिर्यक्कृयवोदराण्यष्टाद्द्धर्वावाव्रीह्यस्त्रयः॥प्रमाणमं
गुलस्योक्तंवितस्तिर्द्वादशांगुला॥२८॥चतुर्विंशांगुलोद्द
ष्टः कुंडानांपरिकीर्त्तितः॥खंन्यमानेयदाकुंडेपाषाणः
प्राप्यतेतदा॥२९॥चतुर्विंशांगुलोद्दिष्टः कुंडानांपरिकी
र्त्तितः॥स्वल्पायुर्मृत्युदेस्याविकेशांगारैर्धनक्षयः॥त्रिं
शांगुलंतुकर्त्तव्यमंतरंग्रहपीठयोः॥३०॥कुंडस्येशान
दिग्भागेविहस्तंपीठमाचरेत्॥किंचिन्म्योन्नतंकयोड ४

येद॥२

ढ्येद्वादशांगुलं॥३१॥वप्रद्वयसमायुक्तंगोमयेनोपले
पितं।मेखलाद्वयसंयुक्तंइतिवप्राः॥३२॥रुद्रकुंभंम सर्वर
रत्नंचसवस्त्रंचसपल्लवं॥तीर्थोदकेनसंपूर्णंसर्वौषधि
समन्वितं॥३३॥पुष्पचंदनसंयुक्तंपीठस्येशानतोन्यसेत्
॥व्रीहयोयवगोधूमामुद्गामाषाःप्रियंगवः॥३४॥ति
लाश्चसप्तमाःप्रोक्ताः सप्तधान्यमिदोच्यते॥न्यग्रोधोडुं
बराश्वत्थाश्चूतजंबूतथैवच॥३५॥अभिषेकेसदाश्रेष्टाः

कथ्यंतेपंचपल्लवाः॥ब्राह्मणावेदविद्वांसोविशिष्टाःसाग्न
यस्तथा॥३६॥कृत्वातेपादकृछ्रंतुगायत्र्यावायुतंजपं॥आ
चार्यश्चैवकर्तव्यःसर्वेभ्यःशुभलक्षणः॥३७॥ऋत्विजोष्टौच
चत्वारोवाप्येकंविदुर्बुधाः॥गायत्र्यादायगोमूत्रंगंधद्वा
रेतिगोमयं॥३८॥आप्यायस्वेतिवक्षीरंदधिक्राव्णेतिवै
दधि॥तेजोसिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकं॥३९॥
ऋत्विजश्चततःप्राश्यपश्चात्कर्मसमाचरेत्॥आचार्यःप्र ५

वरेत्पूर्वमृत्विजःप्रवरंतथा॥४०॥आचायेमिंडपंकुं
डंपंचगव्येनशोधयेत्॥दधिदूर्वाशमीपत्रकुसुमाक्षत
चंदनैः॥४१॥सिद्धार्थोदकपूर्णंतुकृत्वापात्रंकृतांजलिः॥
॥४२॥दध्यक्षतसुमनसोधृतसिद्धार्थकायवाः॥पानी
यंचैवदर्भाश्चअष्टांगोह्यर्घउच्यते॥४३॥यजमानःशुचि
स्नातःशुद्धात्माजितेंद्रियः॥पादशौचार्द्रवस्त्रादौरा

वायदिस्तयोर्वयेत्॥४३॥आगतंमोद्विजश्रेष्ठामदनुग्र
हकारकाःइदमर्घ्यमिदंपाद्यंभवद्भिःप्रतिगृह्यतां॥४४॥
इत्युक्त्वाद्विजपादेषुदद्यादर्घ्यमिदंक्रमात्॥पादप्रक्षाल
नंकुर्याद्दिशिवंदातुनःपुनः॥४५॥द्विराचामंतितेविप्राः
कर्त्ताचैवततःपरं॥अग्नेःपश्चिमतस्थानादाचार्यप्राङ्मु
खाद्विजान्॥४६॥पूर्वामुखान्यथाज्येष्ठंजानुवालस्यपा ६

णिना॥ऋत्विग्वरणनिमित्तंत्ववीयिष्येतितान्वदेत्॥
॥४७॥प्रत्युक्तस्त्ववंयेद्विप्राविन्नराह्यविवर्जितः॥आ
दित्याद्विग्रहर्यन्यमहंकुर्वेत्रकर्मणि॥४८॥ऋग्वेदा
ध्यायिनामोणमाचार्यत्वामहंवृणे॥एवमेवेतरान्व्य
स्तांश्चमस्तान्वातद्वदेव॥४९॥वंदनागुरुकर्पूरक
स्तूरीकुंकुमानिव॥सुगंधिद्रव्यमित्येवमाम्नातंयत्

कर्दमः॥५०॥गंधादिवस्त्रसंयुक्तं दक्षिणाग्निश्चतोथये
त्॥ऋस्ययागस्यनिःपत्त्यै नवंतोभ्यर्थितामया॥५१॥स्व
प्रसादं प्रकर्तव्यं शांतिकं विधिपूर्वकं॥इत्युक्तोपविशे
त्तत्र यावत्कर्मसमाप्यते॥५२॥नित्येनैमित्तिके काम्येश्रा
भिचारिकएव च॥आवसथ्यो विधातव्यो मुख्ये कौतु ७
प्रभृतिकं॥५३॥अर्द्धाधानेतु पक्षोयं सर्वाधानी तु लौ

किके।गृहस्थस्तु षलग्निःस्यात्पंचाग्निश्चतुरग्निकः॥५४
स्याञ्चाग्निरथवैकाग्निर्नाग्निहीनः कथंचन॥तिर्यगूर्द्धस
मिन्मात्राद्दहनात्तिष्ठन्तु खी॥५५॥मृन्मय्योदुंबरी वा
पिवरुस्थालीप्रवक्ष्यते॥पृथक्पृथक्चतुर्थ्यंताःसर्वा
स्वामंत्रभेदनः॥५६॥एकाभिधानास्तंत्रेण मंत्रभेदेप्य
नंतरा॥यथावास्तोष्पदीयादावुपाकरणकर्मणि॥

।५७। आज्यस्यायाउ पत्नीर्यस्रुवेणस्रुवि तत्समत्वान्त्र
वद्येन्मेक्कणेनाथ दर्विर्मध्यावपूर्वतः।५८। तृतीयं जम
दग्नीनां पश्चात्स्यादवदानकं।। एवं शूर्पान्तु लाजानां पात्राः
सक्तादिषु विनं।५९। पुनस्तदभिघार्य क्वातानि तद
विःक्रमात्। द्वितीयादिषु यागेषु वर्विदिष्ववदानकं।।
।६०। सर्वेषु त्वरतो मध्यात्पूर्वार्धाद पिपश्चिमात्।। पि ८

आष्टकायां सर्वाणि वावदायमरुच्छुवि।।६१।। अभि
घारोद्विरेवस्यात्सर्वत्रस्त्रविदर्शनात्। द्रवस्रुवेणवस्या
नान्यवदानानियानि तु।।६२।। यातयामत्वनाशाय
पुनर्देमि सत्समायथा। घृतं वाय दिवा तैलं पयो वा दधि
यावकं।।६३।। आज्यस्थानेनियुक्तानामाज्यत्वं श्रे
विधीयते। आज्यं नामसर्पिरादीनां संस्कारविधिनो

दितं॥६४॥ अनधिश्रयणं दक्षः शेषाणां श्रयणं स्मृतं॥ मु
ख्याभावे यदा गौणं मुपात्तं सद्विनश्यति॥६५॥ तत्र मुख्यो
पमं गौणं ग्राह्यं गौणोपमं न तु। उपात्ते तु प्रतिनिधौ मुख्या
र्थे लिप्सते यदि॥६६॥ तत्र मुख्यमनादृत्य गौणेनैव समा
पयेत्॥ अंतरेणाज्यभागौ वा वा स्विष्टकृतोपि वा॥६७॥
प्रधानमेव तत्सर्वमंगानि वेतराणि तु॥ प्रधानस्याक्रि ९

यायत्र सांगं तत्क्रियते पुनः॥६८॥ तदंगस्याक्रियायां
च नावृत्तिर्नैव तत्क्रिया॥ समाप्तं यदि जानीयान्मयैत
दयथाकृतं॥६९॥ तावदेव पुनः कुर्यान्नावृत्तिः सर्वक
र्मणः॥ दैवतानां विपर्यासे जुहोति तु कथं भवेत्॥७०॥
सर्वप्रायश्चित्तं कृत्वा क्रमेण जुहुयात्पुनः॥ गोपुच्छस
दृशो दंडः समश्लक्ष्णो मनोहरः॥७१॥ खादिरो वाथ पा

र्णा वा वैकंकतमयोपि वा ॥ स्रुवस्त्वरत्निमात्रस्याद्वृत्तोर
वीतथैव च ॥१२॥ स्रुवाग्रे घ्राणवत्खातं द्व्यंगुष्ठं परिमंड
लं ॥ अग्रेणाग्रं च वः खातं पंके मृगपदाकृति ॥१३॥ दर्वी द्व्यं
गुष्ठपृथ्वग्रा तुरीयोनं च मेक्षणं ॥ प्रादेशमात्रं विज्ञेयं च म
द्दो मे प्रकीर्त्तितं ॥१४॥ अग्रमूलस्तु यन्मध्यं मध्यमूलस्तु १०
मध्यमं ॥ तन्मध्यं मध्यमूलं च स्कंवं च तत्र धारयेत् ॥१५॥

अग्निः सोमश्च सूर्यश्च रुद्रश्चैव प्रजापतिः ॥ षष्ठो वैयमदेव
श्च देवताश्च स्रुवेः सदा ॥१६॥ अग्निः स्याने ग्निसंतापं वंड्
णक्केशमेव च ॥ सूर्येण पशुनाशाय रुद्रे रौद्रं भयं भवेत् ॥
॥१७॥ प्रजास्याने प्रजाहृद्धिर्यमे मृत्युः प्रकीर्त्तितः ॥ श्रीप
र्णी खादिरी काश्यवैकंकतपलाशजा ॥१८॥ षट्त्रिंशदंगु
लं स्रुवं पाणिमात्रं स्रुक्पुष्करः ॥ सर्वखातं स निर्वाहः स्रुवः

दंडे पुत्रपौत्रं च जायते। वायुभागे धृते दंडे व्याधितः स्याद्वि त्रिदिवौ यमभागे धृते ॐ ५ ६

श्चार्द्धषडंगुलः॥७९॥ दंडस्तु वर्त्तुलः कार्यः स्वत्तुर्विंशति
रंगुलः। वेदांगुलो भूयामात्रस्थूलाचैव षडंगुलाः॥८०॥
स्रुवाग्रे षडंगुलो वह्निः स्यात् सोम षडंगुलः॥ षडंगुल
स्तथो विष्णुः प्रजापतिः षडंगुलः॥८१॥ वायुः षडंगुलो था
स्यात् यमस्तस्यान्त्य ऽंगुलः। अग्निभागे धृते दंडे भयं वाग्नेः
प्रजायते॥८२॥ प्रजापति धृते दंडे मृत्युरेव न संशयः॥ ११

८२ सोमभागे धृते दंडे बहुरोगं च जायते। विष्णुभागे धृते दं धनधा
न्यं च जायते॥ [illegible]॥ ॐ ५ १

वा स्रुमात्रा प्रकर्त्तव्या स्रुक्स्रुवो हस्तमात्रकः॥८५॥
द्वावप्यग्निमुखौ कार्यौ ऽग्रेषु चंदनवर्द्धितौ। पूर्वं दक्षिण
हस्तेन पश्चाद्वामेन पाणिना॥८६॥ गृहीत्वाथ स्रुक्स्रुवं क
र्त्तव्यं सन्निःसमुद्रया। कुर्याद्दृष्टदलं पद्मं वेद्यां शुक्ल
पटे हृते॥८८॥ ताम्रकांस्याः स्फाटिकाश्च चंदनाश्च सौ
काष्ठजौ। रजतादय सः सीसा कांस्यात्कार्य क्रमादि

मे॥८८॥ मंडलोपरिसंस्थाप्याः सर्वेप्रत्यङ्मुखास्त्वपि। स्व
वर्णैर्वापटेलेख्यागंधैर्मंडलकेऽथवा॥८९॥ आदित्यांगा
रकौरक्तौशुक्लौशुक्रनिशाकरौ॥ पीतोबुधोगुरुश्चैवशे
षाःकृष्णाःग्रहामताः॥९०॥ वर्तुलंचतुरस्रंचत्रिकोणंबा
णमेवच। दीर्घाकृतिचतुःकोणंपंचकोणंधनुस्तथा॥९१
सूर्पंध्वजश्चेत्याकारैर्मंडलानियथाक्रमं॥ हीनाधिकेम १२

वेध्वानिर्व्याधिःशोकस्तथाधिके॥९२॥ प्रमाणेस्तुभवे
त्सिद्धिस्तस्मात्प्रमाणमालिखेत्॥ द्वादशाद्विगुणंचैव
त्रिचतुःषण्णवकयं॥९३॥ सूर्यादीनांक्रमात्सर्ववि
स्तारस्त्वर्धमंगुलं। शुक्रार्कौप्राङ्मुखौज्ञेयौगुरु
सौम्यावुदङ्मुखौ॥९४॥ प्रत्यङ्मुखःशनिःसोमःशे
षादक्षिणतोमुखाः। मध्येतुभास्करंविद्याद्भूमिजंद

वेदक्षिणे ॥९५॥ दक्षिणे लोहितं विंद्याद्बुधं पूर्वोत्तरे
ण तु ॥ उत्तरेण गुरुं विंद्यात्पूर्वेणैव तु भार्गवं ॥९६॥ पश्चि
मेन शनिं विंद्याद्राहुं दक्षिणपश्चिमे ॥ पश्चिमोत्तरतः
केतुस्थाप्या वै शुक्लतंडुलैः ॥९७॥ ग्रहा देवाधिदेवाश्च
दिक्पाला लोकपालकाः ॥ गणपत्यादयः पंच स्थानानि ब
लिदरेश्वरात् ॥९८॥ गणेशाद्यास्तथा पंच स्थानानि देवा 13

स्तथा नराः ॥ अग्निर्दक्षिणतः सूर्यच्छंभुरुत्तरतो रवेः ॥९
९॥ आपउत्तरतः सोमाद्उमा दक्षिणतः स्थिता ॥ भूमिः प
श्चिमतो सोमात्स्कंदो दक्षिणतः स्मृतः ॥१००॥ विष्णुः प्रा
च्यां तु क्षस्थाप्यः पश्चान्नारायणः स्मृतः ॥ इंद्रः पश्चाद्रुद्र
श्चैव ब्रह्मा स्थाप्योथ पूर्वतः ॥१०१॥ इंद्राणी पश्चिमे शु
क्रात्स्याच्चामिकस्तथैव च ॥ प्रजापतिर्नैर्ऋते उशाने राग्ने

यतोयमः॥२०२॥मार्पराज्ञीनैर्ऋतेतुराहोःकालोप
राजिते॥केतोराग्नेयतोब्रह्माचित्रगुप्तस्तुनैर्ऋते॥२०३॥इं
द्रोग्निर्यमश्चैवतथानिर्ऋतिरेवच॥वरुणोवायुसोमे
शाब्रह्माष्टष्ठीप्रकीर्तिताः॥२०४॥इंद्रोब्रह्मायमोवायु
वरुणोलोकपालकाः।गणेशादुर्गाक्षेत्रंचवास्तुवैमध्य
तस्तथा॥२०५॥ताद्विदेवानराम्याप्याःप्रतिष्ठाप्यवि १४

म्या ८

वकृषैः॥आदित्यादीन्यथांनमस्तुमावाहयानिवा॥६॥
मध्यमेमंडलेरक्तंप्राङ्मुखंवर्तुलेस्थिते।कलिंगदेशसंभू
तंकाश्यपंपद्मधारिणं॥७॥सप्ताश्वंद्विभुजंदेवंसूर्यमा
वाहयाम्यहं॥आग्नेयेमंडलेचतुःकोणेप्राङ्मुखंसितं। म्प४
॥२०८॥यमुनादेशसंभूतमत्रिगोत्रंगदाधरं॥दशाश्वं
द्विभुजंदेवंसोममावाहयाम्यहं॥२०९॥दक्षिणेमंड

लेरक्तं त्रिकोणे दक्षिणामुखं ।। आवर्त्तं मेखमारूढं नारव
जं चतुर्भुजं ।। २२० ।। शक्तिशूलगदापाणिं सौममावाहया
म्यहं ।। ईशाने मंडले पीतं बाणाकार उदङ्मुखं ।। २२१ ।।
मागधं सिंहमारूढ मत्रिगो त्रं चतुर्भुजं ।। गदाखेटधनुर्बा
णं बुधमावाहयाम्यहं ।। २२२ ।। उत्तरे पीतकं दीर्घचतुरस्र उ
दङ्मुखं ।। सैंधवं ह्याद्रूढं मं गिरा[illegible]चतुर्भुजं ।। २२३ ।। पुस्त

च

२५

पुर्वास्मिन्मंडले पंचकोणे पूर्वामुखसितं ।। १५ ।।
कदंडाक्षोदकं गुरुमावाहयाम्यहं ।। २२५ ।। पश्चिमे मं
डले कृष्णे धनुष्के दक्षिणामुखं ।। सौराष्ट्रं काश्यपं क्रूरं
गृध्रारूढं चतुर्भुजं ।। २२६ ।। शूलबाणधनुर्बाणं शनिमा
वाहयाम्यहं ।। नैर्ऋते मंडले शूर्पे कृष्णं दक्षिणतो मुखं
।। २२७ ।। बर्बरं पैठिनसिं च सिंहारूढं चतुर्भुजं ।। खड्गशूल
चर्मधरं राहुमावाहयाम्यहं ।। २२८ ।। वायव्ये मंडले ऽ
भोज कं दी र्घ्यासुढं चतुर्बाहुं चमाग विं । कमंडलु हां
स्त्रुगा भा । सुकमावाहयाम्यहं

स्थानध्वजानेयमदिङ्मुखान्॥ अंतर्वेदिसमुद्भूतान्कपो
तामनजैमिनीन्॥२१९॥ क्षित्तुजातान्नादिनोधूम्रान्केतूना
वाह्याम्यहं॥ ग्रहा देवाधिदेवाश्च दिक्पालालोकपाल
काः॥२२०॥ गणेशाद्यास्तथा पंचमानि देवास्तथा नराः
जन्मनूगोत्रमग्निं श्च वर्णस्थान मुखानि च॥२२१॥ श्रुत्वा
वाकुरुतेशांतिं ग्रहास्तेनापमानिताः। मध्याधिकस्त १६

तोहीनोबालःकिंचिन्नतोधिका॥२२२॥ मध्योयुवात्र
योवृद्धाःसूर्याद्याःक्रमशःस्मृताः। कश्यपोत्रिर्भरद्वाज
मात्रेयांगिरसंतथा॥२२३॥ कौरव्यंकाश्यपंचैवपैठि
नंजैमिनंक्रमात्॥ अर्कोजातःकलिंगेषुयामुनेषुच
वेंद्रमा॥२२४॥ अंगारकस्त्ववंत्यायांबुधोयंकौशले
स्मृतः। सैंधवेचगुरुर्जातःसूक्रोभोजकटेस्मृतः॥२२५

शनैश्चरस्तु सौराष्ट्रां राहुर्बर्बरके तथा ॥ अंतर्वेद्यां तथा
केतुरित्येता ग्रहभूमयः ॥ २२६ ॥ सप्तम्यां भानुमान्जातो
ऽष्टम्यां च शनिस्तथा । नवम्यां भार्गवो जातो दशम्यां मं
गलस्तथा ॥ २२७ ॥ एकादश्यां गुरुर्जातो द्वादश्यां बुध
स्तथा ॥ रूपं चतुर्दश्यां सोमो राहुर्जातिस्तु पूर्णिमा ॥ २२८ ॥ २१
यावद्वाजन्न पश्यं तिता वक्राता स्तु केतवः ॥ आदित्यस्य

स्य विशाखा चंद्रस्य च वसुस्तत्तिका ॥ २२९ ॥ भूमिजे पूर्वाषा
ढा च बुधश्चैव धनिष्ठया ॥ गुरोरुत्तरफाल्गुन्यं शुक्रः पुष्य
दैज स्तथा ॥ २३० ॥ शनिनारोहिणी ज्ञेया राहोर्भरणिरु
च्यते ॥ अश्लेषाः केतुपुत्र्ये याग्रहरत्नाण्यनुक्रमात् ॥
२३१ ॥ कपिलः पिंगलो धूम्रः केतुर्जा चरण व च ॥ शिखी
वराटकश्चैव महातेजाः कुनाव्रा नै ॥ २३२ ॥ गुरुर्दिनेश्च

भृगुनंदनश्चस्तत्रस्थसूर्योधरणीसुतस्तथा॥वैश्यपःशाद्वां
कस्तशाशिनंदनश्चशेषाश्चस्तत्राहिमवंतिश्वरा:॥२२॥य
जमानःसपत्नीकोयद्दस्रजांसमारभेत्॥गंधादिभिर्यथा
वर्णैर्नामभिस्तुनमोन्वितैः॥२३॥यजमानःसपत्नीकोय
दस्रजांसमारभेत्॥गंधादिभिर्यथावर्णैर्नामभिस्तुनमो १८
न्वितैः॥२४॥यथावर्णंप्रदातव्यंवासःपुष्पंविलेपनं॥धु

गैकयाथवासर्वंशुक्लवस्त्रंवन्नक्कितः॥२५॥नववर्त्ति
युतंदीपंघृतेनपरिपूरितं॥रक्तचंदनरवेभौमोश्रीखंड
गुरुसोमयो॥२६॥केसरंचबुधेदद्यादगरंराहवेत
था॥कृष्णचंदनंशेषाश्चपूजितावतथाग्रहा॥२७॥
रक्ताश्वकरवीरंवतद्भूतंचकुसुमकं॥चंपकंशतपत्रं
चजातीपुष्पंशमीतथा॥२८॥पुष्पंवागस्त्यपुष्पंप्रोक्तंवि

विचित्राणियथाक्रमं॥ ऊंदरंतंडुलंघृतंरालकंलद्ध
नंततः॥१३९॥ अगरंघृतबिल्वंचगुग्गुलंलाद्दनंतथा
॥गुडोदनंतथायसंवृहद्विषंक्षीरसाष्टिकं॥१४०॥द
ध्योदनंहविश्चूर्णंमांसंविचित्रान्नमेवच॥ द्राक्षेक्षुपूग
नारिंगंजंबीरंबीजपूरकं॥१४१॥ उत्तमानालिकेरंचदा
डिमानियथाक्रमं॥ दद्याद्भक्ष्ययथालाभंपूगंपत्रादि १९

कंतथा॥१४२॥ मूलानियानिभोज्यानिफलानितानिनि
दापयेत्।पत्रंपुष्पंफलंतोयंरत्नानिविविधानिवा।४३
गृहाणार्घमयादत्तंदेहिमेवांछितंफलं॥ आदित्याद्याः
ग्रहाःसर्वेपीवेयत्रप्रतिष्ठिताः।४४।तेगृह्णंतुमया
दत्तमिममर्घंनमोनमः। आयुर्विद्यांधनंदत्त्वयशःसौ
ख्यंचपुष्कलं॥१४५॥ पुत्रांदत्त्वधनंदत्त्वसर्वान्कामां

श्वदत्तमे॥ अर्कःपलाशःखदिरोह्यपामार्गोथपिप्पलः

॥२४६॥ उडुंबरःशमीदूर्वाकुशाश्चसमिधःक्रमात्॥ अ

लाभेतुप्रकर्त्तव्याःसर्वाःपालाशवृक्षजाः॥२४७॥ होत

व्यामधुसर्पिर्भ्यांदध्नाक्षीरेणवाप्लुताः॥ आर्द्रांपक्वांस

मछेदांतर्ज्जन्यंगुलिवर्त्तुलां॥२४८॥ ईदृशीहोमयेत्सा

ज्ञःप्राप्नोतिविपुलांश्रियं॥ प्रादेशमात्रीराकृत्यनह २०

स्नानाधिकानवेत्॥२४९॥ व्याधिनाशःसर्वकामःधनपु

त्रपशुस्त्रियः॥ पापक्षयोदीर्घमायुर्धर्मवृद्धिर्यथाक्र

मं॥२५०॥ अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतथा॥ अष्टा

विंशतिरष्टौवाएकैकस्यतुहोमयेत्॥२५१॥ एकैकाव

घृताहुतिरेकैकावचरोस्तथा॥ स्वकीयेनवमंत्रेणदे

यावैकग्रहंप्रति॥२५२॥ पर्वप्रमाणमाकृत्यापवां

रा

गुलिगृहीतया॥ मध्वाज्यक्षीरसंयुक्तांश्चयवाननुक्र
यान्विलान्॥२५३॥ उत्तानेनतुहस्तेन अंगुष्ठाग्रेणपी
डितः॥ संहितांगुलिपाणिस्तु वाग्यतोऽनुक्रयाद्धविः॥२५४
दानंप्रतिग्रहोहोमोभोजनंबलिरेवच॥ सांगुष्ठेनसदा
कार्यमसुरेभ्योऽन्यथाभवेत्॥२५५॥ नमुक्तकेशोऽनुक्र
यान्नानिपातितजानुकः॥ अनिपातितजानुस्तुराक्षसे २१

र्जुक्रयाद्धविः॥२५६॥ स्रुविजोंऽनुक्तामग्नौयद्धविःप
ततेबहिः॥ सर्पषवारुणोन्नागस्तस्मादप्सुविनिक्षिपे
त्॥२५७॥ क्रियमानेहविर्यत्तुबहिःपततियद्धविः॥ द
र्भस्यस्कंदमंत्रेणतदग्नौनिक्षिपेत्पुनः॥२५८॥ आज्ञ
ल्येनाप्यायस्वाग्निर्मूर्द्धेतिध्रुवंध्वंसबृहस्पते॥ अतियदर्य
श्रुक्रंतेऽन्यच्छमग्निःकयानःकेतुंकृण्वन्निनिग्रहमं

त्राः॥अग्निंदूतमस्तुमेस्योनाष्टथिवीदंविष्णुरिंद्रश्रे
ष्ठानीद्राणिमामुनारिष्ठप्रजापतेनत्वदायंगौर्वल्लज
न्यानमितिदेवतामंत्राः॥कद्रुद्रायगौरीर्मिमाययद
क्रंदःसहस्रशीर्षाब्रह्मणस्पतेत्वातारमिंद्रंपरेयिवां
संकायमानस्त्वंनश्चित्रऊत्येत्यधिदेवतामंत्राः॥त्राता
रमिंद्रंत्वंनोअग्नेतवयस्मिन्वृक्षेप्रतार्यासुरुद्रन्नमंव २२

रुणानोनियुद्भिर्वयंसोमतमावानमस्मेरुद्रास्योना
ष्टथिवीतिदिक्पालमंत्राः॥ऐंद्रमानसिंब्रह्मणस्पते
परेयिवांसंवायवायाद्दिवरुणःप्राविततिलोकपा
लमंत्राः॥गणानांत्वाजातवेदसेक्षेत्रस्यपतिनावा
स्तोष्पतेप्रतिमरुतोयस्यहिक्षयइतिपंचदेवतामंत्रा
ः॥अग्निर्ऋषिःप्रजापतआप्यायस्वकद्रुद्रायादिति

द्यौर्बृहस्पतेअतियदर्यः कालिकोनामोदीरनामवरेन्न
डोनोअग्निर्जुनातीनःसवितापश्चातादिह्वष्टारंवा
यवायाहीन्द्राग्नीआगतमानोमित्रावरुणात्वातारमिं
द्रंव्रतायद्विः समुद्रज्येष्ठा मामसश्चर्षणीधृतस्तस्सविद्वर्व
रेण्यमिदंविष्णुर्येनिःसपत्नावरुणःप्रावितारंनोअ
जएकपाडुतनोहिर्बुध्न्यःपूषागाअश्वेऽतनएषोउषाःप २३

रेयिवांसमित्यष्टाविंशतिर्नक्षत्रदेवतामंत्राः॥ब्रह्मण
स्पतेत्वमिदंविष्णुःकडुद्रायेतिनरामंत्राः॥वेदादयस्त्र्यं
बकश्चलक्ष्मीश्वाथसरस्वती।मरुत्पर्जन्यवसवोविश्वे
देवाःश्विनीसुतौ॥गायत्रीमहाव्याहृतिश्चेत्यस्यापित
देवता।अग्निमीलइषेत्वाग्नआयाहिशंनोदेवीरिति
वेदादयः॥त्र्यंबकंसकुमिवपावकानोमरुतोमारु

तस्यनः पर्ज्जन्यायप्रगायतयेनः सपन्नाविश्वेदेवास
एषोउषाः स्वस्सवित्तुर्वरेण्यंपन्तुर्न्नूवःश्वेतपस्यापितद्दोमः
॥पश्चादग्नेर्यजमानस्ततस्यागंसमाचरेत्॥ मंत्रोक्तदे
वतानामवन्तुर्थ्यंतमिदंपदात्॥पण्यधेनुःशंखवःस्तथा
नद्वाहेमवासोद्दयःक्रमात्॥ स्तस्यागोरायसंज्ञागोग्र
हाणांदक्षिणास्मृतः॥२६०॥ हिरण्येनसमाःकार्यीय २५

जमानेनदक्षिणाः॥हिरण्पमथवादद्यात्कुरुर्वायेन
तुष्यति॥२६१॥गंधपुष्पैरलंकृत्यकृत्वोपस्कारसंयुताः।
स्वस्वमंत्रेणदातव्याःसर्वाःसर्वत्रदक्षिणाः॥२६२॥
कपिलेनसर्वदेवानांपूजनीयासिरोहिणी॥सर्वदे
वमयीयस्मात्अतःशांतिंप्रयछमे॥२६३॥पुण्यस्त्वं
शंखदेवानांमंगलानांचमंगलं।विस्तुनाविधृतोनि

त्यमतः शां०॥२६४॥ रक्षोद्भवजरूपेण पवित्रं मंगलप्रदं

। अनड्वान्कुजसंप्रीत्या अतः शां०॥२६५॥ हिरण्यगर्भग

र्भस्थं हेमबीजं विभावसोः । अनंतपुण्यफलदमतः शां०

॥२६६॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं । प्रदानात्त

स्य तद्विष्णो रक्ष शां०॥२६७॥ कपिलोऽश्वरूपेण यस्मा 25

दमृतसंभवः । चंद्रार्कवाहनो नित्यमतः शां०॥२६८॥ य

स्मात्त्वं पृथिवी सर्वा धेनुकेशवसंनिभा ॥ सर्वपापहरा

नित्यमतः शां०॥२६९॥ यस्मादायसकर्माणि तवाधीना

नि सर्वदा ॥ लांगलादीन्यायुधानि अतः शां०॥२७०॥ य

स्मात्त्वं छागयज्ञानामंगत्वेन व्यवस्थिताः । योनिर्विभा

वसोर्नित्यमतः शां०॥२७१॥ ब्राह्मणं विनियोगं वछंदा

र्षंवसदेवतं । अन्यायाद्वापं वतन्मंत्रेन तस्य फलमश्नुते ।

॥२७२॥ तत्रासनोपविष्टस्य पत्नीपुत्रादिभिः सह॥ कुंभैः क
लशतोयेन पल्लवैः स्वाभिषेचनं॥२७३॥ यद्विञ्छसिपावि
त्रं सर्वतीर्थाभिषेचनं॥ ब्राह्मणस्य करान्मुक्तं तोयं शिर
सि क्षरय॥२७४॥ आदित्यश्चंद्रमा भौमो बुधो जीवः सितो
र्कजः। ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च पूजिताः॥२७५॥ २६
सर्वे समुद्राः सरितः सरांसि सजलानि च। आयांतु यजमा

नस्य दुरितक्षयकारिणा॥२७६॥ संवत्सरायनमासास्तिथि
वारश्च नाडिका। मुहूर्त्तान्यभिषिंचंतु नक्षत्राणि दिवानिशं
॥२७७॥ आदाय रुद्रकलशं द्विजैः सार्द्धं ततो गुरुः॥ पंचांग
रुद्रजाप्येन पूतं शांतिप्रदं शिवं॥२७८॥ कलाकला हि दे
वानां दानवानां कलाः कलाः॥ विग्रहा निर्मितो येन क
लशस्तेन कथ्यते॥२७९॥ कलशस्य मुखे ब्रह्मा ग्रीवायां

तुमहेश्वरः॥ मूलेतु विन्यसेद्विष्णुं मध्ये मातृगणं तथा॥
॥२८०॥ कुक्षौ समुद्राश्चत्वारः सप्तद्वीपाच मेदिनी॥ अर्जु
नी गोमती चैव चंद्रभागा सरस्वती॥२८१॥ कावेरी कृष्ण
वेणा च गंगा चैव महानदी॥ तापी गोदावरी चैव माहेंद्री
नर्मदा तथा॥२८२॥ नदाश्च विविधा जाता नद्यः सर्वास्त
था नराः॥ प्रभासं पुष्करं चैव नैमिषं च हिमालयं॥२८३॥

विश्वेश्वरं विश्वनाथं गंगासागरसंगमं॥ पृथिव्यां यानि
तीर्थानि कलशस्थानि तानि वै॥२८४॥ शांतिः पुष्टिश्च गा
यत्री सावित्री कलशेस्थिताः॥ ऋग्वेदस्तु यजुर्वेदः सामवे
दस्त्वथर्वणः॥२८५॥ अंगैस्तु सहितास्त्वेते कलशेतु समा
श्रिताः॥ कलशोदकेन मंत्रैस्तु यः कुर्यादभिषेचनं॥८६॥
आयुरारोग्यमैश्वर्यं लभेत्कामांस्तु पुष्कलान्॥ कपिलः

पिंगलो धूम्रः केतुर्जीठरपवच ॥२८७॥ शिखीवहाटकर
श्चैवमहातेजाः कृतात्मनो ॥ चतुर्भिश्च चतुर्भिश्च वाम्यांपंच
भिरेवच ॥२८८॥ क्रियते च पुनर्वाम्यां तस्मैयज्ञात्मनेनमः ।
नवग्रहमखेकार्यो मंडपः कुंडमेववा ॥२८९॥ स्थंडिलं
द्रकलशस्थापितानां वरुणादिकं ॥ कुशंडी भूमिसंस्कारश्र २८
वाग्नित्रयणांतिका ॥२९०॥ स्थापनं नैव ग्रहादीनां प्र

जासंक्षेपतस्ततः ॥ स्मृता निवारणाद्याज्यभागांता च कुशं
डिका ॥२९१॥ समिदाज्यचरूणां च होमस्तिलयवैः क्रमा
त् ॥ पंचांगरुद्रजपनं ततो होमस्य दशांशकः ॥२९२॥ ग्रहप्र
जार्घदानं च प्रार्थनार्चनकल्पनं ॥ वह्निप्रजा बलेदानं प्र
स्रक्तिरतः परं ॥२९३॥ स्विष्टकृत्पूर्विकावह्नेः होमांता
च कुशंडिका ॥ होमसंपद्दक्षिणादीनां नृपमाश्चैवक

ल्यनं॥२९४॥अभिषेकादिमांगल्यंनार्यस्त्रानांतस्य
च॥प्रणीतानांविमोकादीशांतितावकशांडिका॥२९५
विसर्जनंग्रहादीनांपदार्थानामयंक्रमात्॥विसृष्टःम
वकल्याणंनवग्रहमखंतथा॥२९६॥शांतिंदराज्यदंश्री
दमायुरारोग्यवृद्धिदं॥अभिषेकंमूर्ध्निदोमंमांगल्यंस्ववि २९
वाचनं॥२९७॥कांस्यपात्रंसतांबूलमाज्यंदीपनंबुधाः
॥पात्रीवीर्यदानन्तोजैषा॥न्तर्धेस्थैचैवकारयेत्॥व्रीहितंदुलसं
हतं दूर्वांकुरदामीयुतं॥१९८॥

समिदाक्षानमेतेषांग्रहयज्ञेविधीयते॥२९९॥दक्षिणादा
नमेतेषांतेषांब्राह्मणभोजनं॥यन्मेशांतिकंकल्याणमृ
गीहंमोक्षकीर्त्तिः॥३००॥अग्निवारेतथाप्रेतेमूकरीक
ष्यतेबुधैः॥मुक्तकनिष्टकतज्ज्यांदंसोमुक्तकनिष्टि
का॥३०१॥मूकरीकरसंकोरीमुद्रयत्रवदाहृताः॥अं
कारश्चवषट्कारोभावतोब्राह्मणाःपुराः॥३०२॥अग्नि

त्वाद्विनिर्येनीतेनेमोमंगलाविनौ॥एकाशीतितमा
न्यवत्रिंःसप्तन्यधिकानिवा॥२०३॥महारुद्रेदशांशेयमा
दिदैवतदाहृत॥नवंस्नूनशतान्यष्टौमदस्याशिदैशौव
तु॥२०४॥महारुद्रदशांशोदयजुर्वेदंतदाहृतः॥गजव
क्रोगणाध्यक्षोसर्वविघ्नविनायकः॥२०५॥लंबोदरस्त्रिने ३०
त्रायश्चांगदगणनायकः॥हेमाद्रीतनयांदेवीवरदांभैरवी

तिष्ठाधिवीन्यसेत्॥३ तेयसला ३

प्रिया॥२०६॥लंबोदरस्यजननीगौरीमावाहयाम्यहं॥
उणपादेस्थिरनक्तेस्थंडिलेत्रिंशदंगुले॥२०७॥चतुः
कोणंसुतस्याप्यस्योनैर्नूमसंज्ञोध्यमदीध्रोरभिमंत्रव॥
स्वपतेतिमंत्रेणसप्तधान्यविनिक्षिपेत्॥२०८॥अग्निकं
दंनितयंकलशंस्थाप्ययदुविः॥आपूर्णत्रिदकस्तुंपूर
येदभिवावृतं॥२०९॥हिरण्यप्रक्षिपेत्तत्रहिरण्यगर्भ

हुत्वा॥इदंतेपात्रमध्वकूसपात्रेणनिपकूयेत्॥२२०॥
स्थंडिलंविघ्नराजस्यगौर्याश्चस्थापनंततः॥वरुणंब्रा
ह्मणानांचततोमंत्रासनाक्रिया॥२२१॥स्थापनंकलशा
नांचतेषुमंत्रासनाक्रिया॥कुशंडीवरुपांतायलघुपूजा
तयोरपि॥२२२॥श्वेताभिधारणावाज्यभागावकुशंडिका॥
मंत्रासनोपविष्टस्यकल्केनाघृत्तंनंततः॥२२३॥गंधैर्मुद्भिर्वि ३२

लेपस्यदक्षिणास्यस्त्रिवावनं॥कलशेस्नपनंतश्चतैल
होमस्यमस्तके॥२२४॥यजमानेच्छयास्नानंवरोराक्षत
योरपि॥विनायकांबिकापूजाप्रणामोर्वस्तथाञ्जलिः॥
२२५॥सकलाश्चैवपूजायाउपस्थानपृथक्पृथक्॥कुं
शंडीस्विष्टकृत्सर्वाद्यावद्धविवर्जिता॥२२६॥होमश्चद
क्षिणादीनांकल्केनामंगलक्रिया॥बलिदानवरोत्रे

घारवारःसर्पमोचनं॥२२७॥ गोरुचंदनकस्तूरीबाल
कंचप्रियंगवकस्तूरीचंदनानिच॥ कुष्टमांसदहरिद्रेच
पूर्वाश्लोलयचंदनं॥२२८॥ ववाकविरमुस्तावसवैरीषधं
परिकीर्तिता॥ कस्तूरिकायाद्वौभागौद्वद्वारश्चंदनस्यच॥
कुंकुमस्यत्रयश्चैकाशशिनस्याच्चतुःसमं॥ कर्पूरचंद
नंदर्प्पकुंकमंचसमांसकं॥ सर्वगंधमितिप्रोक्तं समस्त ३२

सुरवल्लभं॥२३०॥ इतिलघुशौनकीयसमाप्तः॥ ॥छ॥
॥श्रीः॥ ॥श्रीरस्तु॥ ॥शुभंभवतु॥ ॥श्रीः॥॥
ग्रंथपुरेवास्तव्यंशु·श्रीपघोषशु·श्रीपगणेसुतशुक्ल
नीलकंठपठनार्थंशुभंभवतु॥ ॥कल्याणमस्तु॥